# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, एप्रिल-२०१६

| | | |
|---|---|---|
| **कक्षा - शास्त्री-३ ( Sem_6 )** | **प्रश्नपत्र-७** | **गुणाः - ७०** |
| **विषयः - वेदसंहिता** | CE 3.6.11 | **समयः - ११:०० तः ०२:००** |
| **दिनाङ्कः - २५-०४-२०१६** | | **सन्दर्भग्रन्थः - सामवेदः, अथर्ववेदः-पृथिवीसूक्तम्** |

---

**युनिट-१**

**प्रश्नः -१ अधोलिखितेषु मन्त्रेषु द्वयोः मन्त्रयोः व्याख्या कार्या । ०८**

*(१) परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत् ।*
*दधद्रत्नानि दाशुषे ॥*

*(२) अग्निर्वृत्राणि जङ्घनद् द्रविणस्युर्विपन्यया ।*
*समिद्धः शुक्र आहुतः ॥*

*(३) उप त्वाग्ने दिवे दिवे दोषावस्तर्धिया वयम् ।*
*नमो भरन्त एमसि ॥*

**प्रश्नः -२ सामवेदस्य आग्नेयकाण्डस्य द्वितीयखण्डस्य विषयवस्तु प्रस्तूयताम् । ०८**

*अथवा*

*अग्निदेवस्य महत्त्वं पठितमन्त्राधारेण विशदयत ।*

**प्रश्नः -३ द्वयोः टिप्पणी कार्या । ०४**

*(१) सामगानम् ।* *(२) हव्यवाहम् ।*
*(३) मेधातिथिः ।* *(४) अग्निमिन्धानः ।*

**प्रश्नः -४ अधस्तनेषु पञ्च एव शब्दाः भाष्यदिशा प्रतिपादनीयाः । ०५**

*(१) गिरः ।* *(२) दाशुषे ।* *(३) ओजसे ।* *(४) अङ्गिरः ।*
*(५) विवस्वदा ।* *(६) यज्ञः ।* *(७) पाहि ।*

**युनिट-२**

**प्रश्नः -५ अधस्तनेषु द्वयोः मन्त्रयोः व्याख्या सायणभाष्यदिशा विधेया । ०८**

*(१) त्वे अग्ने स्वाहुत प्रियासः सन्तु सूरयः ।*
*यन्तारो ये मघवानो जनानामूर्वं दयन्त गोनाम् ॥*

*(२) आ नो अग्ने वयोवृधꣳरयिं पावक शꣳस्यम् ।*
*रास्वा च न उपामाते पुरुस्पृहꣳ सुनीती सुयशस्तरम् ॥*

*(३) अदर्शि गातु वित्तमो यस्मिन्व्रतान्यादधुः ॥*
*उपो षु जातमार्यस्य वर्धनमग्निं नक्षन्तु नो गिरः ॥*

**प्रश्नः -६ यज्ञकर्मणि अग्निदेवस्य योगदानं यथाशास्त्रं निरूपयत । ०८**

*अथवा*

*सामवेदस्य आग्नेयकाण्डे वर्णितं अग्नेः स्वरूपं स्तुतिं च प्रतिपादयत ।*

**प्रश्नः -७ द्वयोः टिप्पणीं लिखत ।** ०४

*(१) 'साम' शब्दस्यार्थः ।* *(२) सामवेदस्य शाखाः ।*

*(३) जातवेद अग्निः ।* *(४) समिधाग्निः ।*

**प्रश्नः -८ अधस्तनेषु पञ्च एव शब्दाः भाष्यदिशा प्रतिपादनीयाः ।** ०५

*(१) शोचिषा ।* *(२) पावकः ।* *(३) राधः ।*

*(४) रयिम् ।* *(५) वसुः ।* *(६) अध्वरम् ।*

**युनिट-३**

**प्रश्नः -९ द्वयोः मन्त्रयोः ससन्दर्भं व्याख्या विधेया ।** ०८

*(१) अग्निर्भूम्यामोषधीष्वग्निमापो बिभ्रत्यग्निरश्मसु ।*
*अग्निरन्तः पुरुषेषु गोष्वश्वेष्वग्नयः ॥*

*(२) असंबाधं बध्यतो मानवानां यस्या उद्वतः प्रवतः समं बहु ।*
*नानावीर्या ओषधीर्या ब्रिभ्रर्ति पृथिवी नः प्रथतां राध्यतां नः ॥*

*(३) यस्यामापः परिचराः समानीरहोरात्रे अप्रमादं क्षरन्ति ।*
*सा नो भूमिर्भूरिधारा पयो दुहामथो उक्षतु वर्चसा ॥*

**प्रश्नः -१० आधुनिकयुगे पर्यावरणसंरक्षणे पृथिवीसूक्तस्योपादेयतां वर्णयत ।** ०८

*अथवा*

**पृथिवीसूक्ताधारेण पृथिव्याः धारणार्थं के के गुणाः अवलम्बनीयाः प्रतिपादयत ।**

**प्रश्नः -११ एकस्य टिप्पणीं लिखत ।** ०२

*(१) वसुधानि ।* *(२) पर्जन्यः पिता ।*

**प्रश्नः -१२ अधस्तनेषु द्वयोः शब्दयोः व्याख्या विधेया ।** ०२

*(१) हव्यवाहम् ।* *(२) हिरण्यवक्षा ।*

*(३) विष्ठा ।* *(४) उक्षतु ।*

---------------------